ऋतुत्रयमयनं तथा च वाजसनेयिनः पञ्चाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनन्ति । "यान् षण्मासान् दक्षिणादित्य एति, यान् षण्मासानुदङ्ङादित्य एतीति" तथा छन्दोगा अधीयते । "यान् षड्दक्षिणैति- मासान् तान्, यान् षडुत्तरैति मासांस्तानिति" तैत्तिरीयाः क्रतुग्रहब्राह्मणे पठन्ति "तस्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेणैति" एवं चादित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवैतत् अत एव विष्णुधर्म्मोत्तरे सौरमानमधिकृत्योक्तम् "ऋतुत्रयं चायनं स्यादिति" केचित्तु चान्द्रमानेनायनद्वयमभ्युपगच्छन्ति "मार्गमासादिकैस्त्रिभिः ऋतुभिः कल्पितः कालः षण्मासात्मकमुत्तरायणं ज्यैष्ठमासादिकैः दक्षिणायनमिति तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यं श्रौतस्मार्त्तकर्मानुष्ठाने तु मकरकर्कटसंक्रान्त्यादिक एवायनद्वयकाल इति यथोक्तश्रुतिस्मृतिभ्यामवगन्तव्यम् उत्तरायणस्य यागकर्माङ्गत्वं कण्वा अधीयते "उदगयन आपूर्य्यमाणे पक्षे पुण्याहे द्वादशाहमुपसद्व्रती भूत्वेत्यादि" । चौलादीनामुत्तरायणकर्त्तव्यता गृह्यस्मृतिषु प्रसिद्धा । सत्यव्रतश्च देवताप्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विधिनिषेधावाह "देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ । दक्षिणाभिमुखे कुर्व्वन् न तत्फलमवाप्नुयादिति" उग्रदेवतानां प्रतिष्ठा दक्षिणायने कर्त्तव्या तथा च वैखानससंहितायामभिहितम् "मातृभैरववाराहनारसिंहत्रिविक्रमाः । महिषासुरहन्त्री च स्थाप्या वै दक्षिणायन इति" कालमाधवीये माधवः । "सौरेण द्युनिशोर्मानं षडशीतिमुखानि च । अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" । सू॰सि॰ उक्तेः अयनं सौरमानेनैवेत्यवगम्यते । क्रान्तिवृत्तारम्भस्थानचलनं च सर्वेषां राशीनां स्वस्वस्थानात् प्राक् पश्चाद्वा अयनांशानुसारेणान्यत्र स्थाने भवति । तस्य स्फुटानयनमयनसंक्रान्तिशब्दे वक्ष्यते । "संक्रान्तिषु यथा कालस्तदीयेऽप्ययने तथा" का॰मा॰ स्मृतिः । एति सम्वृद्धिमनेन करणे ल्युट् । १२ सत्रविशेषे यथा गवामयनम् तद्विवरणं गवामयनशब्दे । अयनेन निर्वृत्तम् अयनस्येदं वा अण् । आयनम् अयनसाध्ये अयनसम्बन्धिनि च त्रि॰ । "युतायनांशोडुपकोटिशिञ्जिनी जिनांशमौर्व्या गुणिता विभाजिता । द्युजीवया लब्धफलस्य कार्म्मुकम् भवेच्छशाङ्कायनदिक्क्रमायनमिति" आयनं वलनमस्फुटेषुणा सङ्गुणं द्युगणभाजितं हृतम् । पूर्वपूर्वधृतिभिर्ग्रहाश्रितव्यक्षभोदयहृदायनाः कलाः "अस्फुटेषुवलनाच्चतिस्तु वा षट्हृत् फलकलाः स्युरायनाः" इति च सि॰शि॰ । अयने भवः ठञ् । आयनिकः अयनभवे त्रि॰ स्त्रियां ङीप् ।

**अयनकाल** पु॰ अयधारः कालः । अयनांशाधारे काले

**अयन(च)वलन** न॰ ६त॰ । अयनांशस्य प्राक् पश्चाद्वा स्थानान्तरचलने ।

**अयनज** पु॰ अयनात् राशीनां स्वस्वस्थानचलनात् जायते जन—ड । अयनांशजाते मासादौ ।

**अयनभाग** पु॰ अयनज्ञापको भागः । अयनांशे ।

**अयनमास** पु॰ अयनकृतः मासः । अयनांशानुसारेण दिनमानादिज्ञानार्थं कल्पिते मासे ।

**अयनसंक्रम** पु॰ अयनांशानुसारेण संक्रमः । मेषादिषु राशिषु अयनांशानुसारेण ग्रहाणां प्रभापुञ्जसञ्चारे अयनसंक्रान्तिशब्दे विवरणम् ।

**अयनसंक्रान्ति** स्त्री अयनेन राशिचक्रस्य पश्चात्, प्राग्वा-गत्या कृता संक्रान्तिर्ग्रहाणां प्रभापुञ्जस्य सञ्चारः सम्+क्रम—क्तिन् । चलसंक्रान्तौ, संक्रान्तिस्त्रिविधा मध्या-चला अचला चेति भेदात् मध्यानुपदं वक्ष्यते मेषादिभिर्द्वादशभिः स्थानैर्विभक्तस्य निराधारतया स्थितस्य राशिचक्रस्य दोलायमानतया प्राक् पश्चाद्वा निर्द्दिष्टमेषादिस्थानात् पश्चात् पूर्व्वं वा राश्यन्तरे मण्डलगतिं विनापि ग्रहाणां प्रभापुञ्जमात्रसंचारः चलसंक्रान्तिः अनियतस्थानतया चलत्वात् । निर्द्दिष्टराशिस्थानेषु ग्रहाणां मण्डलसञ्चारः अचलसंक्रान्तिः राशिसंक्रान्तिरिति चोच्यते तस्या नियतमेकस्थान एव जायमानत्वादचलत्वम् । अनयैव संक्रान्त्या यथा मासादिव्यवहारे न दोषः चलसंक्रान्त्या तु बहवो दोषास्तथा निरूप्यते तथा हि ग्रहाणामाक्रान्तराशितो राश्यन्तरक्रमणं संक्रान्तिरित्युच्यते सा च द्विधा मध्यमा स्पष्टा च । षट्कर्म्मसंस्कृतो मध्यग्रहो यदा राश्यन्तरं संक्रामति तदा मध्यसंक्रान्तिरित्युच्यते यदा तु स्पष्टीकृतसंस्कारो ग्रहो राश्यन्तरं गच्छति सा स्पष्टसंक्रान्तिरित्युच्यते तत्र मध्यसंक्रमस्य स्पष्टीकरणार्थत्वादेव तज्जनितसंक्रान्तेः स्पष्टीकार एवोपयोगात् लोकशास्त्रयोर्व्यवहारे न तस्य उपयोगः किन्तु "गुरोर्मध्यमसंक्रान्तिहीनोयश्चान्द्रवत्सरः । अधिसंवत्सरस्तस्मिन् कारयेन्न सवत्रयम् । वर्जनीया प्रयत्नेन प्रतिष्ठा सर्वनाकिनाम् स्फुटसंक्रान्तिहीनश्चेत् कोऽप्याहुरधिमासकम्" इति कालमाधवीयधृतस्मृतेः मध्यसंक्रान्तेरपि अधिवत्सरोपयोगिता तदन्यत्र तु तस्या-